This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-783

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 783 विषय पुराण
नाव. शिवलिंग प्रतिष्ठाविधी (mss)
लेखक/लिपीकार —
पृष्ठ 8 काळ — पूर्ण/अपूर्ण

॥ बौधायनोक्त शिवप्रतिष्ठा ॥

बौधा०

१

॥ श्रीगणेशायनमः ॥ अथबौधायनोक्तलिंगप्रतिष्ठाविधिः ॥
तत्रकर्तापूर्वेद्युः कृतनित्यक्रियः कृताधिकारार्थप्रायश्चित्तः ॥
देशकालौसंकीर्त्य ॥ ममकरिष्यमाणशिवप्रतिष्ठाधिकारसिध्य
र्थंएकप्राजापत्यप्रत्याम्नायेनविहितायाः शास्त्रीयोपकल्पितगो
नि ८ मूल्यत्वेनंस्वीयीभूताः इमाः रजतमुद्रिकाः ब्राह्मणायसंप्रददे ॥ आच
म्यपवित्रपाणिः प्राणानायम्य ॥ देशकालौस्मृत्वाममशाश्वतब्रह्म
लोकावाप्तयेश्रीपरमेश्वरप्रीत्यर्थंचसपरिवारलिंगप्रतिष्ठांक
रिष्ये ॥ तदंगगणपतिपूजनादिनांदीश्राद्धांतंकृत्वाचार्यादीन्वृणुया
त् ॥ ततः आचार्यः देशकालौ० शिवप्रतिष्ठाख्येकर्मणियजमानेन
वृतोहं आचार्यकर्मकरिष्ये ॥ आचार्यायदत्तेत्यादिप्रादेशांतद्द

शि

त्वा ॥ प्रासादेंकुरारोपणादिब्रह्मादीनांस्थापनंपूजनंबलिदानं
सूत्रवेष्टवेष्टदर्भमालांचरक्षा ॥ ततः आचार्यः निशायांपंचगव्ये
नहिरण्यदूर्वांकुरयवाश्वत्थपलाशपर्णमिश्रोदकेनलिंगमभिषिं
चेत् ॥ आपोहिष्ठेतितिसृभिः हिरण्यवर्णाभि- तिचतसृभिः पवमा
नः सुवर्चेनाइत्यनुवाकेनव्याहृतिभिश्च ॥ ततः फलपुष्पदूर्वाक्षता
न्यादायपीठेनमस्तेरुद्रमन्यवइतिमंत्रेणनिक्षिप्यलिंगंस्थापयित्वा
रक्षोहणंवाजिनमितिप्रतिसरंबध्वासंपूज्यवाससाकुशैश्चा
च्छाद्य ॥ अवतेहेडउदुत्तममितिजलेधिवासयति ॥ अथद्वितीये
न्हिलिंगतोभद्रदेवताः संपूज्यप्रतिद्वारंकलशान्स्थापयित्वाऋत्विजो
लिंगमुत्थापयेयुः ॥ उत्तिष्ठब्रह्मणस्पतइत्यनेनमंत्रेण ॥ जलास्ता

बौ॰प्र॰
बौ॰ धा॰

२

ताहत्वासश्चत्वारो ब्राह्मणाः प्रतिमामुत्थापयेयुः ॥ शुचौ देशे स
मवस्थाप्य ॥ ततो बौधायनोक्तं पुण्याहं वाचइत्वा ॥ प्रार्थयेत् ॥ स्वा
गतं देवदेवेश विश्वरूप नमोस्तु ते ॥ शुद्धे पित्वदधिष्ठाने शुद्धिं कुर्मे सह
स्वताभिति वल्मीकमृत्कषायैरनुलिप्य ॥ शुद्धोदकेन स्नापयेत् ॥
ततो मंत्रसाधितपंचगव्येन नमस्ते रुद्र मन्यव इत्यष्टाभिर्ऋग्भिः स्ना
पयित्वा ॥ शमीपलाशखदिरबिल्वाश्वत्थवैकंकतन्यग्रोधपनसा
म्रशिरीषोदुंबरवृक्षाणां त्वक्कषायकलशोदकेनाभिषिंचेत् ॥ अ
श्वत्थे व इति मंत्रेण ॥ ततो मणिमुक्ताप्रवालसुवर्णोदककलशो
दकेन हिरण्यवर्णा इत्यभिषिंचेत् ॥ अग्निः सप्तिमिति लोह

बौ॰ प्र

धातोत्तारणं केचिदाहुः ॥ लिंगं पीठांतरे निवेश्य ॥ युवं वस्त्राणीति
वस्त्रयुग्मं दत्वा गंधाक्षतपुष्पधूपदीपनैवेद्यैः संपूज्य ॥ ततो आ
चार्यः ॥ तैजसपात्रस्थं मधु सुवर्णशलाकया गृहीत्वा नेत्रोन्मीलनं
यात् ॥ तत्रादौ बलिं प्रदर्श्य ॥ हिरण्यगर्भइत्यष्टोदीपान्प्रज्वा
ल्य ॥ अष्टदिक्षु बलिं स्थापयित्वा ॥ हिरण्यगर्भः सम॰ य आत्म
दा॰ यः प्राणतः॰ यस्येमे हिम॰ येन द्यौ॰ यं क्रंदसी॰ आपोह य॰
यश्चिदापः॰ पश्चात्सुवर्णशलाकया चित्रं देवानामिति मंत्रेण स्व
यं पार्श्वे स्थित्वा सहतूर्यघोषेण रेखैकं नेत्रां संमृज्योन्मीलयेत् ॥ त
दानकश्चित्पुरतस्तिष्ठेत् ॥ ॐ नमो भगवते रुद्राय हिरण्यरेत

बौ॰भा॰
३

सेपरायपरमात्मनेविश्वरूपायउमाप्रियायनमः ॥ इतिसंलिख्य ॥ अंजंति
लेतिमध्वंजनं ॥ नबाणलिंगेध्वितिकेचिदाहुः ॥ आचार्यायसब
सांगास्यात ॥ देशाका॰नेचोन्मीलनांगं आचार्यायहिरण्यद्वारागोम
दानंकरिष्ये ॥ इतिसंकल्प्यकृत्वा ॥ ततोदेवमुत्थाप्यकुशप्रस्तरेशुभ्र
वस्त्रमाच्छाद्यप्राकूशिरसंदेवंशाययेत् ॥ प्राजापत्योयंमुहूर्तस्तत्रसु
का ॥ ततः आचार्यःकुंडेस्थंडिलेवाग्निंप्रतिष्ठाप्य ॥ पूर्वोच्चारि
त॰सपरिवारशिवप्रतिष्ठाकर्मणिसूर्यादिनवग्रहस्थापनंकरि
ष्ये ॥ सपूज्यअन्वाधानंकुर्यात् ॥ ततोअस्मिन्नित्यादिवक्ष्यमाणे
अत्रप्रधानं ॥ ग्रहान्रुद्रान्द्रव्यैः उक्तसंख्याभिः ॥ मंडपपक्षेवास्तु

शि॰प्र॰

लिंगतोभद्रदेवताः आज्येनएकैकयाहुत्या ॥ पुनरत्रप्रधानंश्रीरुद्रं
यानइषुःशिवतमाद्रापेअंधसस्पतेसहस्राणीत्यनुवाकत्रयमंत्र
संख्यया आज्येनएकैकयाहुत्यापरिवारदेवतास्तत्तन्मंत्रैः अष्टा
ष्टसंख्याज्याहुतिभिः ॥ भवायदेवायस्वाहेति अष्टभिः अष्टोगौ
दनेनभवस्यदेवस्यपत्न्यैस्वाहेति अष्टभिः अष्टोगु[illegible]दनेनभवस्य
देवस्यसुतायस्वाहेति अष्टभिर्हरिद्रोदनेन त्र्यंबकायघृताद्राभिः
मिश्रितंहविस्त्र्येणशेषेणस्विष्टकृतमित्यादिवक्ष्ये ॥ आज्यभागां
तंहुत्वा ॥ यजमानेनद्रव्यत्यागंकुर्यात् ॥ कुंडसमीपेपिधानाकल द्वि॰२
शंसंस्थाप्य ॥ तत्रसंपाताधारयेत् ॥ ततोग्रहवास्तुहोमंचव

बौधा०

स्ता ॥ प्रधानहोमः ॥ यातइषुःशिवतमाऽइत्यनुवाकशेषेणद्रापेअंधसःस्प
तेसहस्राणिसहस्रशाऽइत्यनुवाकाभ्यांचप्रतिमंत्रंआज्येनजुहु
त्वा ॥ यातइषुःशिवतमा ॥१॥ यातेरुद्रशिवातनु ०२ ॥ यामिषुंगि
रिशंतहस्ते ०३ ॥ शिवेनवचसा ०४ ॥ अध्यवोचदधि ०५ ॥ असौ
यस्ताम्रोअरुण ०६ ॥ असौयोवसर्पति ०७ ॥ उतैनंविश्वाभूता
निसदृष्टोमृडयातिनस्वाहा ॥ वाक्यत्रयेनैकाहुतिः ॥ नमो
अस्तुनीलग्रीवाय ०८ ॥ प्रमुंचधन्वन ०९ ॥ अवतत्यधनु ०१० ॥
विज्यंधनुः ०११ ॥ यातेहेतिर्मीढुष्टम ०१२ ॥ नमस्तेअस्त्वायुधा ०१३ ॥
परितेधन्वनः ०१४ ॥ द्रापेअंधसस्पते ०१५ ॥ यातेरुद्रशिवातनूः

शि०

बौधा०

शिवा ०१६ ॥ इमारुद्राय ०१७ ॥ मृडानोरुद्रोतनो ०१८ मानो
महांत ०१९ ॥ मानस्तोके ०२० ॥ आरात्तेगोघ्न ०२१ ॥ स्तुहिश्रुत ०
२२ ॥ परिणोरुद्रस्यहेतिः ०२३ ॥ मीढुष्टमशिवतम ०२४ ॥ विकि
रिदविलोहित ०२५ ॥ सहस्राणिसहस्रधा ०२६ ॥ सहस्रा
णिसहस्रशो ०२७ ॥ अस्मिन्महत्यर्णवे ०२८ ॥ नीलग्रीवाः
शितिकंठाः ०२९ ॥ नीलग्रीवाःशितिकंठादिवं ०३० ॥ येव
क्षेषुसस्पिंजरा ०३१ ॥ येभूतानामधि ०३२ येअन्नेषु
वि ०३३ ॥ येपथां ०३४ येतीर्थानि ०३५ ॥ यएतावंतश्च
०३६ ॥ नमोरुद्रेभ्योयेप [illegible] ॥ थिव्यांयेषामन्न

बोधा॰

५ मिषवस्तेभ्यो॰३८॥ नमो रुद्रेभ्यो येंतरिक्षे येषां वात इषवः
स्तेभ्यो॰३८॥ नमो रुद्रेभ्यो ये दिवि येषां वर्ष॰३९॥ सर्वो वै रु
द्र इति लिंगं स्पृशेत्॥ संपातजलेन देवमभिषिंचेत्॥ एवं प्र
तिपर्यायः पंचोपचारपूजा संपातानभिषेकः॥ पूर्ववत्पुनस्ता
भिर्हुत्वा॥ कद्रुद्रायेति मध्यं स्पृशेयुः॥ पुनस्ताभिर्हुत्वा॥
नमो हिरण्यबाहव इति अंगं स्पृशेत्॥ पुनस्ताभिर्हुत्वा॥ सं
पूर्णेन रुद्रेण सर्वांगं स्पृशेत्॥ रुद्रयं जातवेदसमिति देवमु
त्थाप्य॥ सद्योजातादिपंचभिर्मंत्रैर्देवालयं प्रविश्य मणिमु
क्ताप्रवालसुवर्णरजतानि गर्तमध्ये स्थापयित्वा॥ नमस्ते

शि॰प्र॰
५

रुद्र मन्यव इति लिंगं स्थापयेत्॥ कवाघोरिनिस्त्वं बलिहृतस्कृत॥
इत्यंतं पठित्वा॥ स्थिरो भवेति स्थिरीकृत्य॥ अथ गंधपुष्पधूपदीपा
न्याकाशो मुखानि रुद्रोपस्थाय आवाहनं करोमि॥ ॐ भूः पुरुष
मावाहयामि॥ ॐ भुवः पु॰ ॐ स्वः पुरुष॰ ॐ भूर्भुवः स्वः पुरु॰॥ त
तो देवं स्पृष्ट्वा॥ ऋत्विज इहेवेध्वीति चतस्र ऋचो जपित्वा॥ ततः
प्रणवेन कृतषडंगन्यासः॥ प्राणप्रतिष्ठां कुर्यात्॥ अस्येव प्राणाः
तिष्ठंतु॥ अस्येव प्राणारक्षंतु च॥ अस्ये देवत्वमर्चायै मामहेति
च कश्चन॥ पंचदशप्रणवावृत्तीः कुर्यात्॥ यजमानः लिंगस्य
दक्षिणकर्णे गायत्रीं जपेत्॥ स्वागतं देवदेवेश मद्भक्त्या त्वमिहा

बौधा॰

६

गतः॥ सान्निध्यंसर्वदादेवस्त्वाचार्यापरिकल्पयेतिप्रार्थ्य॥ ततोरत्नां
बुकलशेनाभिषिंचेत्॥ प्रणवेनकूर्चासनंदत्वा॥ दूर्वाविष्णुक्रांतश्या
माकपद्मपत्रकलशेनपाद्यं॥ क्षीरकुशाग्रयवतिलदूर्वाभिरर्घ्यं॥
एलालवंगकर्पूरमिश्रोदकेनाचमनं॥ इमाआपःशिवतमाःपूतत
मामेध्यामेधतमाअमृताअमृतरसाः॥ पाद्यार्घाःस्ताजुषंतांप्र
तिगृह्णातुभगवान्महादेवोरुद्रायनमः॥ स्नानपर्यंतंअस्यमंत्र
स्यावृत्तिः॥ नमोअस्तुनीलग्रीवायेतिप्रतिसरंविस्रयंति॥ इमे
गंधाःशुभादिव्याःसर्वैर्गंध्यैरलंकृताः॥ पूताब्रह्मपवित्रेणपूताः
सूर्यस्यरश्मिभिः॥ प्रतिगृह्णातु॰ नमइतिगंधाः॥ इमेमाल्याः

शि॰ प्र॰
६

दिव्याःसर्वमाल्यैरलंकृताः॥ पूता॰ पुष्पं॰ वनस्पतिरितिधूपं॰ ज्यो
तिःशुक्रश्चतेजश्चदेवानांसततंप्रियं॥ प्रभाकरोमहातेजादीपोयंप्रतिगृ
ह्यतां॰ दीपं॰ कृसरपायसगुडोदनहरिद्रोदनइतिहविर्भिः॥ पवित्रंतेवित
तमितिनैवेद्यं॥ तांबूलादिपुष्पांजल्यांतांपूजांसमाप्य॥ ॐभवायदे
वायनमः॥ शर्वायदेवा॰ रुद्रायदेवा॰ पशुपतयेदे॰ उग्रायदे॰ महतोदे॰
भीमायदे॰ ईशानायदे॰ एभिःपुष्पांजलिंदत्वा॥ स्तैरेवमंत्रैस्तर्पयामि
ततोअष्टनामभिःस्विन्नौदनंजुहुयात्॥ भवस्यदेवस्यपत्न्यैस्वाहेतिअष्ट
भिःगुडोदनं॥ तत्सुतायेत्यष्टभिर्हरिद्रोदनं॥ जुहुयात्॥ त्रीणिहवि
षेकीकृत्यप्रतिमंत्रमेकैकामाहुतिंजुहुयात्॥ त्र्यंबकंयजामहेसु॰

बाभा०

६

मा नो महांतं० मा नस्तोके० आरात्तेगोघ्न० विकिरिद० सहस्राणि सहस्रशो०
ततोद्वादशनामभिरस्यैव होमः ॥ ॐ शिवाय नमः स्वाहा ॥ ॐ शंकराय० ॐ
सहमानाय० ॐ शितिकंठाय० ॐ कपर्दिने० ॐ ताम्राय० ॐ अरुणाय०
ॐ अपगुरमाणाय० ॐ हिरण्यबाहवे० ॐ सस्पिंजराय० ॐ बभ्लुशा
य० ॐ हिरण्याय स्वाहेति पूर्ववद्देवताभिर्हुत्वा ॥ स्विष्टकृतादि होमशेषं
समाप्य ॥ हविःशेषेण बलिं दद्यात् ॥ तत्र मंत्रः ॥ त्वामेकमाद्यं पुरुषं पुरा
णं रुद्रं शिवं विश्वसृजं यजामहे ॥ त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्म
प्रतिगृह्णीष्वस्मन्तु ॥ अथाग्रेणाग्निमश्वत्थपर्णेषु हुतशेषं निदध्या
॥ ॐ भूर्भुवः स्वरोमिति त्रिरुक्त्वा बलिमुपहरेत् ॥ ततः आचम्य

नां
मूा

पा०प्र०
श्रि० ६६
॥

नयेदग्निं प्रदक्षिणां कृत्वा ॥ विश्वभुजे नमः ॥ सर्वभुजे० आत्मने० प
०पूर्णाहुत्यादि समाप्य ॥ देवं प्रणिपत्य ॥ प्रार्थयेत् ॥ यावच्चंद्रावनीसू
र्यौ तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वमात्र देवेश स्थेयं भक्तानुकंपया ॥ इति संप्रा
र्थ्य ॥ कर्तृपूर्वकं अमुकेश्वर इति नाम कृत्वा ॥ ततो नामकरणांतं नाम्ना देवस्यो
त्तरपूजां कृत्वा ॥ आचार्यादीन् संपूज्य ॥ गां दत्वा यथायथं संपूज्य ॥ ब्रह्मणे
णे वृषभं० सदस्याय अश्वं ॥ ऋत्विग्भ्यो यथाशक्ति दक्षिणां दद्यात् ॥ कृतस्य
कर्मणः सांगतासिध्यर्थं द्वादश ब्राह्मणान् भोजयिष्ये ॥ ब्राह्मणैः संपू
र्णतां वाचयेत् ॥ मंडपदेवताग्निं विसृज्य ब्राह्मणाशिषो गृहीत्वा ॥ सुहृ
द्युक्तो भुंजीतेति ॥ इति बौधायनोक्तलिंगप्रतिष्ठाविधिः समाप्तः ॥
श्रीसांबार्पणमस्तु ॥ श्रीव्यंकटेशार्पणमस्तु ॥ इदं पुस्तकं आवळे इति ॥

दि

ना

॥ बौधायनोक्तशिवप्रतिष्ठासमाप्त ॥ श्रीकृष्ण ॥

शि॰ प्र॰
६

```
[OrderDescription]
,CREATED=28.08.19 11:00
,TRANSFERRED=2019/08/28 at 11:03:30
,PAGES=10
,TYPE=STD
,NAME=S0001569
,Book Name=M-783-SHIVLING PRATISHTHA VIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,
```